THE BAPS SWAMINARAYAN RESEARCH

JOURNAL

बी.ए.पी.एस. स्वामिनारायण शोधपत्रिका

Volume 1 - Issue 2

December 2022

वचनामृतशीर्षकदर्शनम्

Dr. Shrutiprakashdas Swami
Ṣaḍdarśanācārya, Ph. D., D. Litt.

Disclaimer: Statements and opinions in the articles and reviews published within the BAPS Swaminarayan Research Journal are those of the respective authors and contributors and not of the Journal or the BAPS Swaminarayan Research Institute, New Delhi. Neither the Journal nor the BAPS Swaminarayan Research Institute makes any representation, expressed or implied, in respect of the accuracy of the material published within this journal and do not accept any legal responsibility or liability for any inaccuracies, errors, or omissions that may have been made.

e-ISSN: 3048-9741
https://research.baps.org/journal

pp. 27-48

वचनामृतशीर्षकदर्शनम्

DR. SHRUTIPRAKASHDAS SWAMI
Ṣaḍdarśanācārya, Ph. D., D. Litt.

सारांशः

जगति विद्यमानानि सकलशास्त्राणि भवन्ति शीर्षकयुक्तानि। तत्तच्छीर्षकेणैव तत्तच्छास्त्रं प्रथते किल। यथा हि वेद-तदन्तर्गतसंहिता-ब्राह्मण-आरण्यक-उपनिषत्सु, तथा च रामायणमहाभारतादीतिहासा, भागवतादिपुराणानि, मन्वादिस्मृतयः, सांख्यादिदर्शनानीत्यादिसर्वग्रन्थेषु शीर्षकाणि दरीदृश्यन्ते। तत्र मुख्यग्रन्थस्य ततस्तदन्तर्गतमुख्यप्रकरणानां ततस्तदन्तर्गताऽवान्तरप्रकरणानाम् इत्येवं क्रमेण दृश्यते शीर्षकपद्धतिः। तथैव गुर्जरभाषानिबद्धे परब्रह्मस्वामिनारायणोप-दिष्टवचनामृतग्रन्थेऽपि प्रत्येकं वचनामृते शीर्षकाणि सम्प्रदायप्रसिद्धानि। गुर्जरभाषानिबद्धान्येतानि शीर्षकाण्येवाऽस्मिन् संशोधने चिन्तनविषयाणि। तथा हि कथं तत्तद्वचनामृतस्य कथं तत्तच्छीर्षकं संजातमिति संक्षेपेण विविच्य दर्श्यते। तदनु तेषां वचनामृतशीर्षकाणां दार्शनिकदृष्ट्या विहङ्गावलोकनेन हि शोधपत्रस्याऽस्य प्रधानो विषयः। तत्राऽपि द्वैविध्यम् अनुसृतम् – साधारणचिन्तनाऽनुसारं सम्प्रदायस्थापकपरब्रह्मस्वामिनारा यणस्य सिद्धान्तानुसारं चेति।

विषयप्रवेशः

ग्रन्थशीर्षकोपरि संस्कृतभाषायां शोधात्मकोऽयं प्रायः प्रथमः प्रयासः स्याच्छोधलेखेतिहासे। तत्त्वदर्शन-सामाजिक-ऐतिहासिक-काव्य-नाटक-आरोग्य- शिल्प-विज्ञान-भूस्तरशास्त्र-खगोलशास्त्र- राजकीयादिविषयाणां शोधलेखानि प्रायः विषयस्थपदार्थानां बाहुल्यात् सरलतया लिखितुं शक्यते, न तादृशं शीर्षकविषयलेखने। शीर्षकेष्वप्यवान्तरशीर्षकस्यायं शोधलेखः। तत्रापि दार्शनिकदृष्टिविलोकनायायं प्रयासः।

शीर्षकं खलु ग्रन्थस्य प्रकरणस्य वा सम्पूर्णं चित्रं प्रस्तौति। शीर्षकद्वारा लेखकस्य वैदुष्यमथवा तद्धृदयगता भावा अपि विज्ञायन्ते। शीर्षकं पठित्वैव जनास्तत्पुस्तकं पठनीयं न वेति विचारयन्ति। कस्यापि ग्रन्थस्य शीर्षकं कथं तादृशमेवेति चिन्तनं नातिसरलम्। शीर्षकं मुखस्थानीयम् । मुखं विलोक्य जना आकृष्यन्ते तथैव शीर्षकं विलोक्य तत्पठनार्थं विलोकनार्थं वा जना लुभ्यन्ते। एषा रीति वेदसाहित्यादारभ्य वेबसाईटसाहित्यपर्यन्ता समाना। अहो शीर्षकस्य माहात्म्यम्!

शीर्षकशब्दार्थः

कस्यापि विषयस्य परिचयं प्राप्तुं तदुपरि संक्षेपेण लिख्यमानं शीर्षकशब्देन निगद्यते। कस्यापि ग्रन्थस्याथवा लेखस्य परिचायकं शीर्षकं कथ्यते। आङ्गल-भाषायां heading गुर्जरभाषायां મથાળું नाम्ना व्यवह्रियते।

वेदोपनिषत्सु शीर्षकाणि

शीर्षकस्येतिहासः सनातनधर्मस्य शास्त्रेषु प्राचीनो दृश्यते। तत्र सर्वप्रथमं वेद इति शीर्षकमादाय विचारयामः। कथं वेद इति शीर्षकम्? यच्छीर्षकं मन्वादिस्मृतिषु, व्याकरणसूत्रेषु, विविधदर्शनेषु च नैककालादाद्रियते। वेदो नाम ज्ञानराशिः। विदन्ति = जानन्ति, विद्यन्ते = भवन्ति, विन्दन्ति = लभन्ते, विन्दन्ति = विचारयति वा सर्वे मनुष्याः यैर्येषु वा ते वेदाः।[1] चतुर्णां वेदानाम् ऋग्यजुःसामाथर्वेति शीर्षकाणामप्यन्वर्थत्वं पूर्वमीमांसादिषु विलोक्यते।

वेदस्य सूक्तानामर्थानुरूपाण्यथवा शब्दानुरूपाणि शीर्षकाणि पुरुषसूक्त-भूमिसूक्त-नासदीयसूक्त-इत्यादीनि प्राचीनकालात् संश्रूयन्ते। एवमेवोपनिषत्सु शीर्षकस्य वैविध्यं विलोक्यते। तत्र द्वैविध्यं -

१. प्रत्येकस्या उपनिषदो विविधरीत्या शीर्षकाणि
२. ब्रह्मविद्यान्तर्गतानि शीर्षकाणि।

प्रथमेऽपि वैविध्यं यथा -

- प्रथमशब्देन यथा- ईशावास्योपनिषद्, केनोपनिषद्
  अत्र 'ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्। तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥ १॥' इति मन्त्रेणेशावास्योपनिषद आरम्भः। तथैव 'ॐ केनेषितं पतति प्रेषितं मनः' इति मन्त्रेण केनोपनिषद आरम्भः। तदुक्तं स्वामिनारायणकेनोपनिषद्भाष्ये

1. सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे । विन्दते विन्दति प्राप्तौ श्यन् लुक्-श्नम् शेष्विदम् क्रमात् ॥ 'विद् सत्तायाम्' दिवादिगण 66, 'विद् ज्ञाने' अदादिः 69, 'विद् विचारणे' रुधादिः 17, 'विद् लृलाभे' तुदादि- 140, Mudgal S.G. Vaidikatva in indian philosophy and religion, Adharapatra by Sadhu Shrutiprakashdas, p. 1

'तस्या: 'केनेषितम्' इति केनपदारब्धत्वात् केनेति संज्ञा ।'[2]

- आरण्यकशाखानुसारेण यथा- तैत्तिरीयोपनिषद्, कठोपनिषद् , ऐतरेयोपनिषद्
  वेदसंहिता नैकशाखाभिन्ना आसन्। तासु शाखासु काश्चनावशिष्टाः।तच्छाखान्तर्ग तोपनिषत् तत्तन्नाम्ना प्रसिद्धाः। एवं वेदसंहितोत्तरग्रन्था आरण्यकाश्च प्रसिद्धाः, तदन्तर्गता उपनिषदस्तत्तन्नाम्ना व्यवह्रीयन्ते। कृष्णयजुर्वेदीयकठ-शाखान्तर्गतत् वादस्या: कठेति संज्ञा । तथा च कृष्णयजुर्वेदस्य तैत्तिरीयारण्यकस्य ७-९ प्रपाठकरूपा तैत्तिरीयोपनिषद्। एवं हि ऋग्वेदीयैतरेयारण्यकान्तर्गतैतरेयोपनिषत् ।
- परिमाणानुसारेण यथा- बृहदारण्यकोपनिषद्
  तदुक्तं 'शुक्लयजुर्वेदीयवाजसनेयिब्राह्मणान्तर्गतेयमुपनिषद् । अस्याश्चाऽरण्येऽध्ययनात् स्वरूपत इतरापेक्षया बृहत्त्वात्, सर्वतः स्वरूपस्वभावादितो बृहद्भूतयोरक्षरब्रह्म-परब्रह्मणोश्च निरूपकत्वाद् बृहदारण्यकमिति व्यपदेशः ।'[3]
- व्याख्यानानुसारेण यथा- प्रश्न-उत्तररूपत्वात् प्रश्नोपनिषद्
  उक्तं तत् 'सुकेशादिजिज्ञासुकृतषट्प्रश्नोत्तररूपत्वादियं प्रश्नोपनिषदिति प्रसिद्धा।'[4]
- तत्प्रोक्तर्षिनाम्ना यथा- मण्डूकर्षिपुत्रेण माण्डूक्येन मण्डूकर्षिणा वा प्रोक्तत्वान्माण्डूक्योपनिषद्
  तदुक्तं माण्डूक्योपनिषद्भाष्यपरिष्कारे ऐतरेयारण्यके (३/१/१) 'वायुः संहितेति माण्डूकेयः' इति श्रूयते। 'शूरवीरो माण्डूकेयः' इति नु माण्डूकेयानाम् ' इति च। मण्डूकमहर्षिपुत्रः इति तत्र (सायणाचार्यकृता)व्याख्या।[5]
- तद्गतार्थानुसारेण यथा- ब्रह्मविद्यारूपप्रधानार्थप्रतिपादकत्वेन मूर्धन्यस्थानत्वान्मुण्डको पनिषद्। तदुक्तं -इयमुपनिषद् श्रेष्ठत्वेन हेतुना सर्वासामुपनिषत्प्रमाणानां राजमस्तकमिव तस्मान्मुण्डकेति सञ्ज्ञा।[6] द्वितीये ब्रह्मविद्यापदेनाऽपि विविधा अध्यात्मविद्या उपनिषत्सु वर्णिताः। या उपनिषदामवान्तरशीर्षकरूपाः। तत्रैकस्यामप्युपनिषदि नैकाः सन्ति क्वचिच्चैकापि। वेदानामानन्त्याद् विद्याया अपि असङ्ख्यत्वं स्वीक्रियते तथापि प्रायः प्रसिद्धा द्वात्रिंशद् ब्रह्मविद्याः कथ्यन्ते। अत्र काश्चन प्रस्तूयन्ते -

---

2. ईशाद्यष्टोपनित्स्वामिनारायणभाष्यम्, केनोपनिषद् 1/1
3. बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम् 1/1/1
4. ईशाद्यष्टोपनित्स्वामिनारायणभाष्यम्, प्रश्नोपनिषद् 1/1
5. केनाद्युपनिषत्पुरुषसूक्तश्रीसूक्तभाष्यम् माण्डूक्योपनिषद् 1/1, मुण्डक-उपनिषद् और माण्डूक्य – उपनिषद्, पृ. 27, Introductory Note, Māṇḍūkyopaniṣad.
6. 'આ ઉપનિષત્ શ્રેષ્ઠ હોવાથી ઉપનિષદોરૂપ પ્રમાણોમાં રાજાનું મસ્તક છે તેથી આનું મુંડક એવું નામ છે.' श्रीउपनिषदो, 5 अथर्ववेदीय मुण्डकोपनिषद् तात्पर्यदीपिका सहित तथा 'मुण्डक' का अर्थ है - मस्तिष्क को अत्यधिक शक्ति प्रदान करने वाला और उसे अविद्या-रूपी अन्धकार से मुक्त करने वाला। भारतकोश

एकस्यामुपनिषदि एका

१. ईशोपनिषदि ईशावास्यविद्या
२. कठोपनिषदि परमपुरुषविद्या।
३. कौषितक्यां प्रतर्दनविद्या।
४. मुण्डकोपनिषदि ब्रह्मविद्या

एकस्यामुपनिषदि नैकाः

यथा छान्दोग्योपनिषदि। अत्रैकस्मिन् अध्याये क्वचिदेकैव क्वचिच्चानेकाः। यथा –

एकस्मिन् अध्याये एका

सद्विद्या	षष्ठोऽध्यायः
भूमविद्या	सप्तमोऽध्यायः

एकस्मिन् अध्याये नैकाः

प्रथमाध्याये	• अन्तरादित्यविद्या	षष्ठे खण्डे ६-७
	• आकाशविद्या	नवमः खण्डः
	• प्राणविद्या	दशमः खण्डः
तृतीयाध्याये	• मधुविद्या	१-११ खण्डाः
	• ज्योतिर्विद्या	त्रयोदशः खण्डः
	•शाण्डिल्यविद्या	चतुर्दशखण्डः
चतुर्थाध्याये	• संवर्गविद्या	१-३ खण्डाः
	• सत्यकामविद्या	४-९ खण्डाः
	• उपकोशलविद्या	१०-१४ ख.
	• अक्षिविद्या	१५ खण्डः
पञ्चमाध्याये	• वैश्वानरविद्या	११-२४ खण्डाः

बृहदारण्यकोपनिषदि अवान्तरभेदा ब्राह्मणनाम्ना प्रसिद्धास्तस्माद् ब्रह्मविद्या ब्राह्मणान्ता अपि प्रसिद्धाः। तासु तृतीयाऽध्यायस्थास्तिस्रो विशेषरूपेण प्रथिताः। तत्प्रोक्तर्षिनाम्ना, तन्निरूपितगुणैः तत्र निरूपिततत्त्वद्वारा च। यथा च ताः -

१. कहोलविद्या अथवा कहोलब्राह्मणम् । कौषीतकेयकहोलेन प्रश्नस्य पृष्टत्वात् कहोलब्राह्मणम् । तदुक्तं भाष्ये 'अथ कहोलब्राह्मणमुपस्थाप्यत अथ हैनमिति।[7]

२. उद्दालकारुणिना पृष्टमपि अन्तर्यामित्वगुणनिरूपकत्वादन्तर्यामिब्राह्मणम् । एतदपि

7. बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम् 3/5/1

भाष्ये विलोक्यते 'प्रागुक्त-सर्वसमुत्कृष्टब्रह्मलोकाधिपतेः पुरुषोत्तमस्य सर्वान्तर्यामित्वतन्नियामकत्वादि निरूपयितुमिदमन्तर्यामि- ब्राह्मणं प्रवर्ततेऽथ हैनमित्यादिना ।'[8]

३. वाचक्नवीगार्ग्याः पृष्टमपि अक्षरतत्त्वनिरूपितत्वादक्षरविद्याऽथवाऽक्षरब्राह्मणम् ।

तदेवं विद्यापदेनावान्तरशीर्षकाणि परिपठ्यन्ते।

श्रीमद्भगवद्गीतास्थशीर्षकाणि

वामदेवगीता-संपाकगीता-उतथ्यगीता-ऋषभगीता-मङ्किगीता- बोध्यगीता-विचक्ष्नुगीता-हारीतगीता-वृत्रगीता-पराशरगीता-हंसगीता-अनुगीता-श्रीमद्भगवद्गीता महाभारते सन्ति । श्रीमद्भगवद्गीतापदेन प्रसिद्धाः परब्रह्मपुरुषोत्तमेन वासुदेवेऽनुप्रवेशेन गीतत्वहेतुना।

श्रीमद्भगवद्गीतायाः प्रत्येकस्याध्यायस्य विशिष्टाणि नामानि बहुकालात् प्रसिद्धानि। तत्र प्रायोऽध्यायानां नामानि तत्तदध्यायस्थमुख्यविषयं निमित्तीकृत्य योगपदं सम्बद्ध्य विलोक्यन्ते। अत्र भाष्यकारैः प्रदत्तानि शीर्षकाणि विमृश्यन्ते । प्रायः सर्वैः अर्जुनविषादहेतुना विषादयोगः प्रथमोऽध्यायः। कर्मयोग इति तृतीयोऽध्यायः, विभूतियोग इति। दशमोऽध्यायः, विश्वरूपदर्शनयोग इत्येकादशोऽध्यायः, भक्तियोग इति द्वादशोऽध्यायः, क्षेत्रक्षेत्रज्ञयोग इति त्रयोदशोऽध्यायः, पुरुषोत्तमयोग इति पञ्चदशोऽध्यायः, दैवासुरसम्पद्विभागयोग इति त्रयोदशोऽध्यायः, श्रद्धात्रयविभागयोग इति चतुर्दशोऽध्यायः इति शीर्षकाणि ग्रन्थस्य विषयानुरूपाण्यथवा शब्दानुरूपाणि प्रगीतानि। अक्षरब्रह्मनिरूपणहेतुनाऽक्षरब्रह्मयोग इतिनाम्ना प्रसिद्धस्याष्टमाऽध्यायस्य शीर्षकाणि तारकयोग-धारणायोग-अक्षरपरब्रह्मयोग-महापुरुषयोग-ब्रह्माक्षरनिर्देश-इत्यादीनि बहूनि लोक्यन्ते।[9] केषुचिदध्यायेषु विचिकित्स्यानि शीर्षकाणि सन्ति तानि विचार्यन्ते।

स्वामिनारायणभाष्यकारेण भद्रेशदासस्वामिना केषुचिदध्यायेषु नूतनानि शीर्षकाणि प्रदत्तानि तान्यन्यैर्भाष्यकारैः प्रदत्तेभ्यः शीर्षकेभ्यो भिद्यन्ते, किञ्च विशेषरूपेण ग्रन्थस्थसिद्धान्तदर्शनहेतुकानि सन्ति। यथा च तद् विलोकयामः।

8. बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम् 3/7/1
9. संपादकटीप्पणी पृ.66, श्रीमद्भगवद्गीता शाङ्करभाष्याद्येकादशटीकोपेता,भाग-2.

अध्यायः	अन्याचार्यदत्त-शीर्षकम्	भद्रेशदासदत्तं शीर्षकम्	हेतुः
द्वितीयः	साङ्ख्ययोगः	ब्रह्मस्थितियोगः	साङ्ख्ययोगविचाराद् ब्रह्मस्थितिनिरूपणस्य परिमाणतोऽर्थतश्चाधिकत्वात्
चतुर्थः	ज्ञानकर्मसंन्यासयोग/ ब्रह्म- यज्ञप्रसंशायोग	अवतारयोगः	अवतारनिरूपणस्य विशिष्टत्वाद् अध्यात्म-पथ्यधिकोपयुक्तत्वाच्च
पञ्चमः	संन्यासयोगः/ प्रकृतिगर्भयोगः	ब्रह्मनिर्वाणयोगः	लभन्ते ब्रह्मनिर्वाणमृषयः-२५, इतिपरम-पुरुषार्थनिरूपणपरकत्वात्
षष्ठः	ध्यानयोगः	अभ्यासयोगः	ध्यानस्यसिद्ध्या अथवा मनसो विजयेऽभ्यासस्य विशेषरूपेण निरूपणात्
चतुर्दशः	गुणत्रयविभागयोगः	गुणातीतयोगः	अत्रोक्तगुणातीतस्थितेरध्यात्ममार्गे गुणत्रयविभागादिचिन्तनाद् अभ्यर्हितत्वात्
अष्टादशः	मोक्षसंन्यासयोगः	शरणागतियोगः	गुह्यतमज्ञानरूपेण सर्वधर्मान् परित्यज्य... इति श्लोकेन शरणागतेरेवोपदेशात्

तदेवं श्रीमद्भगवद्गीतायां शीर्षकाणां निरूपणं विलोकितम्।

शास्त्रान्तरेषु शीर्षकाणि

ब्रह्मसूत्राणां शीर्षकाण्यपि शारीरकसूत्राणि, वेदान्तसूत्राणीत्यादिनाम्ना प्रसिद्धानि। तस्य प्रत्येकस्याध्यायस्य, अध्यायस्थपादानां, पादस्थाधिकरणानाम् अपि शीर्षकाणि विषयवाक्यानुसारेण निरूपितविषयानुसारेण विषयवाक्यस्थप्रथमशब्दानुसारेण सूत्रस्थप्रथमशब्दानुसारेण च वर्तन्ते। अत्रापि भाष्यानुसारेण बहुविधं वैविध्यं विलोक्यते।

एवं ब्रह्मसूत्रभाष्याणां नामानि शङ्कराचार्यस्य शारीरकं भाष्यम्, रामानुजाचार्यस्य श्रीभाष्यम्, वल्लभाचार्यस्याणुभाष्यम्, गौडीयचैतन्य-सम्प्रदायस्थबलदेवविद्याभूषणस्य गोविन्दभाष्यम्, रामानन्द- सम्प्रदायस्थभगवादाचार्यविरचितमानन्दभाष्यम्,

स्वामिनारायणसम्प्रदायस्थस्वामि-भद्रेशदासप्रणीतं स्वामिनारायणभाष्यमित्यादिकं सम्प्रदायनाम्नाऽथवा स्वसिद्धान्तानुकूलानि शीर्षकाणि दरीदृश्यन्ते।

तदेवं दर्शनान्तरेषु, काव्यनाटकादिशास्त्रेषु आधुनिकविज्ञानसाहित्येषु नवलकथादिषु लघुमहच्चलच्चित्रेषु सर्वत्र शीर्षकाणां वैशिष्ट्यं विलोक्यते। शीर्षकं विना ग्रन्थो न शोभते यथा मस्तकं विना शरीरम्।

शीर्षकाणां शैल्यन्तरम्

शीर्षकाणामन्याऽपि विशिष्टा शैली विलोक्यते। ग्रन्थस्य मुख्यशीर्षकानुरूपाण्यवान्तरशीर्षकाणामुपमोपमेय-भावरूपेण नामानि। यथा -

'हरिचरित्रामृतसागरः'

ग्रन्थेऽस्मिन् सागरपदम् अन्ते निवेशितं तेनावान्तरप्रकरणस्य पूरमिति नाम विलोक्यते। ग्रन्थस्य गुर्जरव्रजमिश्रितभाषाभूषितत्वात् 'पूर' शब्देन नद्यादिषु वेगेन समागतं जलसमूहमभिधीयते। तेषां सर्वेषां सागरं प्रति गतिमत्त्वादयं पूरशब्दः सागरेण सह सम्बद्ध्यते। ततश्चावान्तराध्यायानां नामानि तरङ्गपदेन वर्णतानि। तदेवं सागर-पूर-तरङ्ग इति ग्रन्थस्थशीर्षकाणि निर्मितानि।

'हरिलीलाकल्पतरुः'

ग्रन्थान्ते वृक्षवाचकस्य 'तरु' शब्दस्य संयोजनहेतुनाऽवान्तरप्रकरणानि स्कन्धनाम्ना व्यवहृतानि।

'स्वामिनारायणसिद्धान्तसुधा'

ग्रन्थस्यास्य पीयूषशब्दान्तत्वात् तस्य प्रवहमानार्थत्वाच्चावान्तप्रकरणानां नामानि 'धारा' इति प्रथितानि। इत्येषापि शैली शीर्षकाणां वर्तन्ते।

वचनामृतपरिचयः

भगवत्स्वामिनारायणप्रोक्तेन वचनामृतेन गुर्जरभाषा भूषितेति नाविदितं विपश्चिताम्। वचनामृतं गुर्जरभाषायामपि गद्यसाहित्ये शिखरायितम्।[10] आङ्गलभाषातः सर्वथाऽस्पृष्टं मध्यकालीनगुर्जरभाषासाहित्यस्य चरमसमयस्थम् अर्वाचीन- साहित्यस्यारुणोदयवेलास्थमिदम् इति।[11]

---

10. વચનામૃતનો ગ્રંથ ગુજરાતી ગદ્યસિદ્ધિનું શિખર છે. ઉમાશંકર જોષી, ગુજરાતી ગદ્ય પ્રકારની લક્ષણો, સ્વામિનારાયણ સંતસાહિત્ય, પૃ.૧૪.
11. 'વચનામૃત' ગુજરાતી સાહિત્યનું અંગ્રેજી અસરથી સર્વથા અસ્પૃષ્ટ મધ્યકાલીન ગુજરાતી ભાષા સાહિત્યના અંતિમ તબક્કાનું, પણ અર્વાચીન સાહિત્યનો અરુણોદય થવાની તૈયારી હતી એ સમયમાં પ્રતિષ્ઠિત થયેલું

गुर्जरभाषायामितः पूर्वं प्रायः पद्यसाहित्यमधिकमिति तज्ज्ञानां मतम् । कवीश्वरो नर्मद ईशवीयाब्दात् १८२८ तः कर्नल जेरवीसनामकाङ्गलविदुषो गुर्जरगद्यारम्भम् असूचयत्।[12] परब्रह्मस्वामिनारायणः ईशवीयाब्दे १८३० तमे स्वधाम जगाम । ततः पूर्वं परमहंसैः वचनामृतं सम्पादितम्। अतः गुर्जरगद्ये शिखरायितम्। वचनामृतशीर्षकमपि भगवन्मुखारविन्दान्निःसृतत्वेन मृत्युविजयरूपामृतप्राप्तिहेतुनाऽमृततुल्यत्वेन सार्थकम्।

गुर्जरसाहित्ये शीर्षकाणामितिहासः

गद्यपद्यसाहित्ये मुख्यं शीर्षकं मामेरु, धीरजाख्यान, सतीगीता इत्यादिकं प्राप्यते। परं प्रत्येकस्मिन् पदे पदसमूहे वा विशिष्टमवान्तरं शीर्षकं प्रायः नावलोक्यते। प्रकरणम्, अध्याय इत्यादिशब्दैरेव तद् विज्ञायते।[13] अवान्तरशीर्षकस्याविर्भावः पञ्चात्तनकाले जात इति अनुभूयते। प्रथमं तु गुर्जरभाषागद्यमर्वाचीनम्। अवान्तरशीर्षकाणि तु ततोऽप्यर्वाचीनानि। गुर्जरभाषाया गद्यसाहित्येऽवान्तरशीर्षकारम्भः प्रायः दलपत-नर्मदयुगानन्तरमारब्धः। स च युगः भगवत्स्वामिनारायणस्याक्षरधामगमनान्तरम् ईशवीयाब्दस्य १९३० तमस्यानन्तरमेव। तस्माद्धेतोर्वचनामृतेषु हस्तलिखितेषु ग्रन्थेष्वपि तन्नावलोक्यते।[14] परं कस्मात् कालात्, केन प्रकारेण कीदृग्वैविध्यभरितानि शीर्षकाणि वचनामृतशास्त्रे प्राप्यन्ते तद्विविच्यते।

वचनामृतेऽवान्तरशीर्षकाः

वचनामृतग्रन्थेऽवान्तरविभागा मुख्याः २६२ सङ्ख्याकाः सन्ति। प्रत्येकस्मिन् वचनामृते तत्रावान्तरशीर्षकाणि प्रप्रथमं गोण्डलस्थ-श्रीस्वामिनारायणमन्दिर स्याश्रयेण विक्रमसंवत् २००७तमे वर्षे १९५१ ईशवीयाब्दे मुद्रिते वचनामृतग्रन्थे ततश्च स्वामिनारायण-अक्षरपीठ-अमदावादनगरात् मुद्रितस्य वचनामृतग्रन्थस्यानेकास्वावृत्तिषु विलोक्यन्ते। तेषां शोधदृष्ट्या विलोकनेन दश विभागा दृष्टिगोचरा भवन्ति। ते च यथा -

- **वचनामृतस्थविषयानुसारम्**
  - अखण्डवृत्तेः ग.प्र.१,

  अस्मिन् वचनामृते भगवन्मूर्तौ अखण्डमनोवृत्तिस्थापनं कठिनतमं साधनमिति वर्णितम्।[15]

સીમા ચિહ્ન, ભોગીલાલ આડેસરા, અપૂર્વ ગદ્ય ગ્રંથ વચનામૃત સ્વા. સં. સા. પૃ.૩૬.

12. નર્મદઃ ૧૮૨૮થી કર્નલ જેરબીસથી ગદ્યનો આરંભ સૂચવે છે. ઉમાશંકર જોષી, પૂર્વોકત પૃ. ૧૪.
13. चित्रपट्टम्-1
14. चित्रपट्टम्-2
15. "પછી શ્રીજીમહારાજ બોલ્યા જે, લ્યો અમે ઉત્તર કરીએ જે, ભગવાનના સ્વરૂપમાં મનની અખંડ વૃત્તિ રાખવી તેથી કોઈ સાધન કઠણ નથી." - વચ.ગ.પ્ર.1.

- **वचनामृतगतकेवलार्थानुसारम्**
  - देशवासनाया एकादशपदव्याः ग.प्र. ३७,[16]

अत्र देशवासनां स्वजङ्घास्थव्रणं दर्शयित्वा निरूपयामास । ततश्चोत्तमभक्तस्य माहात्म्यवर्णने तस्य भक्तस्य फलप्राप्तिरेकादशधा वर्णिता। सा च यथा -

१. तदुपरि कालप्रशासनविरामः।
२. तदुपरि कर्मप्रशासनविरामः।
३. तदुपरि मायाप्रशासनविरतिः।
४. यदीच्छेत्तर्हि स्वयं भगवान् एव तं दण्डयेन्नान्ये केचन।
५. तस्य पादरजो भगवान् मूर्ध्नि धारयति।
६. तं दुःखयन् बिभेति भगवान्।
७. तस्य दर्शनमिच्छति श्रीहरिः।
८. स नौकामासित्वा समुद्रं तरीतुमिच्छन् तुल्यो धीमान्।
९. चैतन्यमूर्तिः(ब्राह्मविग्रहः) सन् स भगवद्धाम्नि सदा तिष्ठति।
१०. भगवद्धर्शनतुल्यं तस्य दर्शनस्य फलम्।
११. अनेकपतितजीवानामुद्धर्ता सः।

एता एकादशपदव्यो वचनामृतेऽस्मिन् एकत्र न सन्ति परन्तु समग्रं वचनामृतं समीक्ष्यते चेत्ताः प्राप्यन्ते, तस्मात् केवलार्थानुसारस्य शीर्षकस्य दृष्टान्तः। अन्यान्यपि तादृशाणि वचनामृशीर्षकाणि सन्ति।

- **वचनामृतगतशब्दोपोतार्थानुसारम्**
  - एकैककावस्थायामवस्थाद्वयान्तर्निहितेति सा.६,[17]

अत्र जाग्रत्-स्वप्नसुषुप्त्यात्मकतिसृष्ववस्थासु प्रत्येकस्यामन्या द्वेऽवस्थे विद्येते तस्य सुष्ठु निरूपणं वर्तते। जाग्रति स्वप्न-सुषुप्त्यवस्थे, स्वप्ने जाग्रत्सुषुप्त्यवस्थे सुषुप्तौ च जाग्रत्स्वप्नावस्थे इति।

  - अन्वयव्यतिरेकवर्णनम् ग.प्र.७,सा.५, वर.७,

जीव-ईश्वर-ब्रह्म-परब्रह्मणाम् अन्वयव्यतिरेकलक्षणानि निरूपितानि। अतोऽन्वयव्यतिरेकशब्दोपेतमर्थप्रधानं शीर्षकम्।[18]

---

16. વચનામૃત 37 : દેશવાસનાનું - અગિયાર પદવીનું
17. એક એક અવસ્થામાં બે બે અવસ્થાનું - સા.6.
18. "જન્મ-મરણનું ભોક્તા એવું જે જીવનું સ્વરૂપ તે અન્વય જાણવું; અને અછેદ્ય, અભેદ્ય, અવિનાશી એવું જે જીવનું સ્વરૂપ તે વ્યતિરેક જાણવું. અને વિરાટ, સૂત્રાત્મા અને અવ્યાકૃત એ ત્રણ શરીરમાં એકરસપણે વર્તે એ ઈશ્વરનું અન્વય સ્વરૂપ જાણવું; અને પિંડ-બ્રહ્માંડથી પર સચ્ચિદાનંદપણે કરીને જે નિરૂપણ કર્યું છે તે ઈશ્વરનું

- **वचनामृतस्थशब्दानुसारम्**

◆ देह-कुसंग-पूर्वसंस्काराणां वर्णनम् ग.प्र.५८. क्रोधि-ईर्ष्यालु-कपटि-मानवताम् ग.प्र.७६, जीवमनसोर्मित्रतायाः ग.अं.६.

अत्र शीर्षकस्थविषया विविच्य निरूपिताः।[19]

- **दृष्टान्तानुसारम्**

◆ जलपूर्णघटनिक्षेपणस्य ग.प्र.२३।

एतादृशवचनामृते प्रदत्तो दृष्टान्तः शीर्षके दृश्यते। अत्र घटस्थजलस्य सकृत् प्रक्षेपणेन पृथ्वी हरिता न भवति परं स्वल्पा जलधारा सततं वहति चेत् तत्र सरःसदृशं जायते इति दृष्टान्तेन भगवत्यनवरतं वृत्तिस्थापनाय प्रयतनीयमिति शिक्षयति।[20]

- **प्रश्नकर्त्रनुसारम्**

◆ काकाभाईभक्तस्य – चौरपादलग्नकण्टकस्य ग.प्र.७०, कानदासस्य प्रश्नः वर.२, चिमनरावस्य प्रश्नः वर.६.[21]

एते भक्तास्तत्तद्वचनामृते एकधा द्विधा वा अपृच्छन्। तं प्रष्टारमवलम्ब्यैतानि शीर्षकाणि ग्रथितानि।

- **वचनामृतस्थशास्त्रसन्दर्भानुसारम्**

◆ अंते या मतिः सा गतिः इति श्रुतेः ग.प्र.१४, एकोहं बहुस्यां प्रजायेय इति श्रुतेः

व्यतिरेक स्वरूप जाणवुं. अने प्रकृतिपुरुष तथा सूर्य-चंद्रादिक सर्वे देवता तेनुं जे प्रेरक ते अक्षरनुं अन्वय स्वरूप जाणवुं; अने जे स्वरूपने विषे पुरुषप्रकृति आद्ये कांई उपाधि रहेती नथी, एक पुरुषोत्तम भगवान ज रहे छे, ए अक्षरनुं व्यतिरेक स्वरूप छे. अने बद्ध जीव तथा मुक्त जीव ए बेना हृदयमां साक्षीरूप थका रह्या छे अने बद्धपणुं ने मुक्तपणुं जेने अडतुं नथी, तेम ज ईश्वरना ने अक्षरना हृदयमां साक्षीरूपे रह्या छे अने ते ते उपाधि थकी रहित छे, ए पुरुषोत्तमनुं अन्वय स्वरूप छे; अने जीव, ईश्वर ने अक्षर ते थकी पर जे अक्षरातीत स्वरूप ए पुरुषोत्तमनुं व्यतिरेक स्वरूप जाणवुं. एवी रीते अन्वय-व्यतिरेकपणुं छे." (अन्वयव्यतिरेकनुं - ग.प्र.7, सा.5, वर.7)

19. देह कुसंग अने पूर्व संस्कारनुं - ग.प्र.58; क्रोधी, ईर्ष्यावाळो, कपटी अने मानीनुं - ग.प्र.76; जीव अने मननी मित्रतानुं - ग.अं.6.

20. "जेम पाणीनो घडो भरीने एक ठेकाणे ढोळी आवीए, पछी वळी बीजे दिवस अथवा त्रीजे दिवस ते ठेकाणे पाणीनो घडो ढोळीए तेणे करीने त्यां पाणीनो धरो भराय नहि; कां जे, आगला दिवसनुं जळ आगले दिवस सुकाई जाय ने पाछला दिवसनुं पाछले दिवस सुकाई जाय. अने जो आंगळी जेवी नानी ज पाणीनी सेर्य अखंड वहेती होय तो मोटो पाणीनो धरो भराई जाय. तेम खातां, पीतां, हालतां, चालतां तथा शुभ क्रियाने विषे तथा अशुभ क्रियाने विषे सर्व काळे भगवानमां अखंड वृत्ति राखवी. पछी एवी रीते भगवानमां अखंड वृत्ति राखतां राखतां एवी दृढ स्थिति थाय छे." (पाणीनो घडो ढोळ्यानुं - ग.प्र.23)

21. काकाभाईनुं, चोरने कांटो वाग्यानुं - ग.प्र.70; कानदासजीना प्रश्ननुं - वर.2; चिमनरावजीना प्रश्ननुं - वर.6.

ग.प्र.४१, वंदुप्रथमपदकीर्तनस्य ग.म.४८.[22]

एतादृशेषु वचनामृतेषु तत्तत् सन्दर्भं श्रीहरिर्निरूपयति। अत्र प्रथमद्वितीययोः सन्दर्भयोः श्रुती न्यरूपयत्। तृतीये च प्रेमानन्दस्वामिकृतकीर्तनं निशम्य तदुपरि भगवत्स्मारकभक्तमाहात्म्यमगाय त्।[23]

- **वचनामृतगतग्रामनामानुसारम्**
  - वृन्दावनस्य काश्याश्च ग.अं.१०.[24]

- **वचनामृतसन्दर्भगतव्यक्तिनामानुसारम्**
  - कृतघ्नि – सेवकरामस्य ग.प्र. १०, मांचाभक्तस्य – ग.म. ३८, जनकस्य ज्ञप्तिः, वर. २०, भरतस्याख्यानम् ग.अं. १७. सीतासदृशज्ञप्तेः ग.अं.११.[25]

- **वचनामृतश्रीहरिसंस्थितस्थानानुसारम्**
  - जाराख्यधान्यखनेः ग.म. ३५, गङ्गाजलीयकूपस्य , ग.म. ६७.[26]

वचनामृतशीर्षकेषूपनिषन्नामानि

वचनामृतग्रन्थः खलु भगवन्मुखान्निःसृतत्वाद् वेदतुल्यः प्रामाणिकः। तदुक्तं शतानन्देन मुनिना हरिवाक्य- सुधासिन्धोः सेतुमालाटीकायाश्चरममङ्गलाचरणे श्रीरघुवीराचार्येण--

हरिवाक्यसुधासिन्धुः सर्वग्रन्थशिरोमणिः। विराजतेऽयं सकलसच्छास्त्रोपरि सर्वथा॥ १॥

सच्छास्त्राणां यथा वेदः प्रमाणमधिकं तथा। ग्रन्थोऽयं सर्वथैवाऽस्ति हरेरास्योद्भवत्वतः॥ २॥

अत एव पण्डितकृष्णवल्लभाचार्येण श्रीहरिवाक्यसुधासिन्धोर्वचनामृतभावानुवादात्मकस्य ग्रन्थस्यावान्तर- प्रकरणानां शीर्षकाण्युपनिषदन्तेन प्रदत्तानि यथा -

- अखण्डवृत्त्युपनिषद् गढपुरप्रथमप्रकरण-१
- सविकल्पनिर्विकल्पनिश्चयोपनिषद् लोया-१२

---

22. અંતે યા મતિઃ સા ગતિઃ નું - ગ.પ્ર.14; એકોહં બહુસ્યાં પ્રજાયેય નું - ગ.પ્ર.41; વંદુના કીર્તનનું - ગ.મ.48.
23. "અને સાધુ પ્રેમાનંદ સ્વામી ભગવાનના ધ્યાનના અંગની ગરબીઓ જે, 'વંદું સહજાનંદ રસરૂપ અનુપમ સારને રે લોલ' એ ગાવતા હતા. પછી જ્યારે ગાઈ રહ્યા ત્યારે શ્રીજીમહારાજ બોલ્યા જે, 'બહુ સારાં કીર્તન ગાયાં. આ કીર્તનને સાંભળીને તો અમારા મનમાં એમ વિચાર થયો જે, 'આવી રીતે એને ભગવાનની મૂર્તિનું ચિંતવન છે, માટે એ સાધુને તો ઊઠીને સાષ્ટાંગ દંડવત્પ્રણામ કરીએ.'" (વંદુના કીર્તનનું - ગ.મ.48.)
24. વૃંદાવન અને કાશીનું - ગ.અં.10.
25. કૃતઘ્નીનું, સેવકરામનું - ગ.પ્ર.10; માંચા ભગતનું, પ્રવેશનું - ગ.મ.38; જનકની સમજણનું - વર.20; ભરતજીના આખ્યાનનું - ગ.અં.17; સીતાજીના જેવી સમજણનું - ગ.અં.11.
26. જારની ખાણનું - ગ.મ.35; ગંગાજળિયા કૂવાનું - ગ.મ.67.

- श्रीहरिजन्मधारणोपनिषद् गढपुरमध्यप्रकरण-४८
- निर्विकल्पसमाद्युपनिषद् वरतालप्रकरण-१
- मानसीपूजोपनिषद् गढपुरअंत्यप्रकरण-२३

वचनामृतशीर्षकेषु दार्शनिकी दृष्टिः

दार्शनिकी दृष्टिः द्विधा सम्भवति।

१. साधारणचिन्तनद्वारा

२. सम्प्रदायस्थापकाभिप्राय-तद्धेतुनिरूपणपरा।

तत्र प्रथमा उपरोक्तेषु सन्दर्भेषु विलोक्यते। द्वितीयायै विचार्यते -'मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः।।' (गीता ७/३) इतिवचनानुसारं जनसमवायेषु दार्शनिकी दृष्टिरेव दुर्लभा किमु कथा सिद्धान्त-अभिप्राय-हेतुप्रभृतिकं पक्षे निधाय, वचनामृतरहस्यं साररूपेण सूत्रात्मके शीर्षके संस्थाप्य किमपि प्रदानमिति। सा खलु महती सिद्धिः। अत्र कानिचिच्छीर्षकाण्युदाहीयन्ते यत्रैकत्र सैद्धान्तिकदृष्ट्या दार्शनिकदृष्ट्या गुणातीतानन्दस्वामिनः परम्परया प्राप्तेषु वचनामृतेषु सिद्धान्तप्रतिपादकानि शीर्षकाणि विलोक्यन्ते। अत्र चत्वारो दृष्टान्ता दीयन्ते।

१. ग.प्र.२१ तमसङ्ख्याकम्

वचनामृतमिदं ध्येयं निर्दिशति। तच्च भगवदक्षरधाम, तस्यैव शब्दान् विलोकयामः 'अक्षरस्य द्वे रूपे भवतः। एकं तु निराकारमैकरसं चैतन्यमस्ति। तच्चिदाकाशं कथ्यते, ब्रह्ममहालयं वा प्रोच्यते। तदेवाऽक्षरञ्च द्वितीयस्वरूपेण पुरुषोत्तमनारायणस्य सेवायामवतिष्ठते। (स्थानरूपम्) अक्षरधाम प्राप्तवान् भक्तो (मूर्तरूपस्य) अक्षरस्य साधर्म्यं प्राप्य पुरुषोत्तमनारायणस्याखण्डसेवायाम् (मूर्ताक्षरवद्) अवतिष्ठते। ...तत्राक्षरधाम्नि अक्षरस्य साधर्म्यं प्राप्ता अनन्तकोटिमुक्ताः स्थिताः, ते सर्वे वर्तन्ते दासभावेन श्रीपुरुषोत्तमस्य। ...अतः सर्वैः सत्सङ्गिभिर्निश्चयोऽत्र कार्यो यद् बृहत् तदक्षरधाम प्राप्य तन्मुक्तपङ्क्तौ (मूर्ताक्षरब्रह्मसाधर्म्यप्राप्तमुक्तपङ्क्तौ) स्थातव्यम्। अक्षरधाम गत्वाऽखण्डभगवत्सेवायां स्थातव्यमिति, परन्तु नश्वरं तुच्छं मायिकसुखं न कामयितव्यं नच कुत्रापि लुब्धव्यम्। एतादृशदृढनिश्चयं संरक्ष्य भगवत एकान्तिकी भक्तिर्विधेया।'[27]

27. "તે અક્ષરનાં બે સ્વરૂપ છે - એક તો નિરાકાર એકરસ ચૈતન્ય છે તેને ચિદાકાશ કહીએ, બ્રહ્મમહોલ કહીએ; અને એ અક્ષર બીજે રૂપે કરીને પુરુષોત્તમ નારાયણની સેવામાં રહે છે. અને એ અક્ષરધામને પામ્યો જે ભક્ત તે પણ અક્ષરના સાધર્મ્યપણાને પામે છે અને ભગવાનની અખંડ સેવામાં રહે છે. અને એ અક્ષરધામને વિષે શ્રીકૃષ્ણ પુરુષોત્તમ નારાયણ તે સદા વિરાજમાન છે અને એ અક્ષરધામને વિષે અક્ષરના સાધર્મ્યપણાને પામ્યા એવા અનંત કોટિ મુક્ત રહ્યા છે તે સર્વે પુરુષોત્તમના દાસભાવે વર્તે છે અને પુરુષોત્તમ નારાયણ તે સર્વના સ્વામી છે ને અનંત કોટિ બ્રહ્માંડના રાજાધિરાજ છે. માટે આપણા સત્સંગી સર્વેને તો એમ જ નિશ્ચય કરવો

अत्राक्षरब्रह्मणो रूपद्वयं विशेषरूपेण कीर्तितम्। एकं भगवद्धारूपेण सर्वान् धत्ते, द्वितीयञ्च साधकानामादर्शरूपमिति ग्रन्थावलोकनेन विज्ञायते। किञ्च भगवद्धामापि मूर्तं सन् भगवन्तं सेवते तन्नवीनम्। अत एव तस्य शीर्षके लेखनमुचितम्। तच्च गुणातीतानन्दस्वामिपरम्पराप्राप्तग्रन्थे विलोक्यते। यथा च तत् -

'अक्षरब्रह्मणः स्वरूपद्वयस्य, एकान्तिकभक्तेः' इति।

२. ग.प्र.७१तमसङ्ख्याकम्

अस्मिन् वचनामृते - 'जीवानां निःश्रयसे भगवान् यदा नरवपुर्धारयति तदा स्वीयाक्षरधाम्ना, चैतन्यमूर्तिपार्षदैः, निजैः सर्वैश्चयैः सहावतरति। ...तस्माद् भगवत्स्वरूपं साक्षरधाम पृथिव्यां विराजत इति विज्ञेयमन्येषां समीपे चेयं वार्ता कथनीया।'[28] इत्येवमुपसंहारे श्रीहरिणाऽऽदिष्टाः सर्वे निजाश्रिताः। अस्मिन् वचनामृतेऽन्या अपि वार्ता भगवद्भक्तापराधनिषेध-साकारत्व-निरूपण-ईर्ष्या स्वरूपादिका विलोक्यन्ते। परं सिद्धान्तदृष्ट्या यद्विषयव्याहरणे स्वयं भगवान् आदिदेश सैव वार्ता तात्त्विक-दार्शनिकदृष्ट्योपकारिणीति। सा गुणातीतानन्दस्वामिपरम्परया प्राप्ते शीर्षके विलोक्यते –

'भगवत्स्वरूपं साक्षरधाम विराजते तस्य' इति।

३. ग.म.९ सङ्ख्याकम्

वचनामृतेऽस्मिन् भगवत्स्वरूपस्य बलधारणवार्ता विद्यते। तद्भटकतया भगवत्स्वरूपस्य माहात्म्यं याथार्थ्येन श्रीहरिर्वदति। यथा च - 'तस्मात्स्वेन प्राप्तं भगवत्स्वरूपं सदा दिव्यं साकारमूर्तिकं सर्वावताराणां कारणमिति विज्ञेयम्। यश्चैवं न जानीयान्निराकारं विभवान्तरतुल्यञ्च जानीयात् स खलु भगवतो द्रोग्धेति विज्ञेयम्।'[29]

प्रत्यक्षसहजानन्दं परब्रह्मभगवन्तमन्यैरवतारैस्तुल्यं न जानीयादिति खलु वैशिष्ट्यम्। अत

જે, 'આપણે પણ એ અક્ષરરૂપ જે મુક્ત તેમની પંક્તિમાં ભળવું છે અને અક્ષર-ધામમાં જઈને અખંડ ભગવાનની સેવામાં હજૂર રહેવું છે, પણ નાશવંત ને તુચ્છ એવું જે માયિક સુખ તેને ઇચ્છવું નથી ને એમાં કોઈ ઠેકાણે લોભાવું નથી;' એવો દૃઢ નિશ્ચય રાખીને નિરંતર ભગવાનની એકાંતિક ભક્તિ કરવી." (ગ.પ્ર.21)

28. "ભગવાન જીવના કલ્યાણને અર્થે જ્યારે મૂર્તિ ધારણ કરે છે ત્યારે પોતાનું જે અક્ષરધામ અને ચૈતન્યમૂર્તિ એવા જે પાર્ષદ અને પોતાનાં જે સર્વે ઐશ્વર્ય તે સહિત જ પધારે છે, ... માટે ભગવાનના ભક્તને ભગવાનનું સ્વરૂપ અક્ષરધામ સહિત પૃથ્વી ઉપર વિરાજમાન છે એમ સમજવું અને બીજા આગળ પણ એવી રીતે વાર્તા કરવી." (ગ.પ્ર.71)

29. "તે માટે પોતાને સાક્ષાત્ મળ્યું જે ભગવાનનું સ્વરૂપ તેને સદા દિવ્ય સાકારમૂર્તિ ને સર્વ અવતારનું કારણ અવતારી એવું જાણવું. અને જો એમ ન જાણે ને નિરાકાર જાણે ને બીજા અવતાર જેવા જાણે તો એનો દ્રોહ કર્યો કહેવાય." (ગ.મ.9)

"તેમ પુરુષોત્તમ ભગવાન બ્રહ્માંડ બ્રહ્માંડ પ્રત્યે જ્યાં જેવું રૂપ પ્રકાશ્યું જોઈએ ત્યાં તેવા રૂપને અક્ષરધામમાં રહ્યા થકા પ્રકાશે છે અને પોતે તો સદાય અક્ષરધામમાં રહે છે. અને જ્યાં એ પુરુષોત્તમની મૂર્તિ છે ત્યાં જ અક્ષરધામનું મધ્ય છે." (ગ.મ.42)

एव गुणातीतानन्द- स्वामिपरम्परायां प्राप्तं शीर्षकमस्ति -

'अवतारसदृशविज्ञानेन भगवद्द्रोहः' इति।

४. वच.ग.म.४२ सङ्ख्याकम्

अस्मिन् वचनामृते मुख्यो विषयोऽक्षरब्रह्मणः सगुणनिर्गुणरूपेण माहात्म्यम्। भगवन्माहात्म्यविज्ञानेऽक्षरब्रह्म- माहात्म्यं सेतुरूपम् 'यः सेतुरीजानानामक्षरं ब्रह्म यत्परम्।' इति काठकोपनिषदुक्तेः। भगवान् स्वामिनारायणोऽपि वचनामृते परमात्मनो माहात्म्यकथनावसरे ग.प्र.५१, ६३, ६४ लो.१३ पं.१ ग.म.३ इत्यादिष्वक्षरब्रह्मणो माहात्म्यमवश्यं कथयति। अत एव परब्रह्मणोऽक्षरातीत एव विशेषणं सर्वश्रेष्ठमिति कथ्यते। अत एवास्मिन् वचनामृते भगवान् कथयति 'पुरुषोत्तमो भगवान् प्रति ब्रह्माण्डं यथा स्वं रूपं प्रकाशनीयं तथा प्रकाशयति स्वयञ्चाक्षरधाम्नि सदैव निवसति। यत्र च पुरुषोत्तमस्य मूर्तिस्तत्राक्षरधाम्नो मध्यमिति विज्ञेयम्' इति।

गृहस्य वाऽन्यस्योद्घाटने यथा कुञ्चिकायाः स्थानं तथैव भगवन्माहात्म्योद्घाटने तथा तद्द्वारा चात्यन्तिककल्याणप्रापणेऽक्षरब्रह्मणः स्थानमिति। एवंरीत्याऽन्वयव्यतिरेकेणाक्षरब्रह्मणो माहात्म्यस्य भगवन्माहात्म्ये वैशिष्ट्यं विलोक्यास्य वचनामृतस्य शीर्षके कुञ्चिकाया इति परम्पराविचक्षणैः संस्थापितम्।

'सगुणत्वनिर्गुणत्वमक्षरब्रह्मणः, कुञ्चिकायाः' इति।

उपसंहारः

इत्येवंरीत्या शीर्षकाणामितिहासस्तेषां वैविध्यं तेषु दार्शनिकदृष्टीत्यादिकमत्र प्रतिपादितम्। अत्र वचनामृतशीर्षकाणि गोण्डलस्थश्रीस्वामिनारायण मन्दिरस्याश्रयेण मुद्रिताद् वचनामृतग्रन्थान्नीतानीति प्राक् कथितम्। तस्मिन् द्वितीयमुखपृष्टेऽक्षरब्रह्मणो गुणातीतानन्दस्वामिनश्चित्रमूर्तिं मुद्रित्वा तदधो लिखितमस्ति 'वचनामृस्य रहस्यविज्ञाता तथा तं विज्ञापयिता सद्गुरुगुणातीतानन्दस्वामी'इति।[30] भगवन्माहात्म्यविज्ञाने कुञ्चिकारूपोऽक्षरब्रह्मावतार एव वचनामृतानि सम्यग् ज्ञात्वा शीर्षकाणि प्रदातुं समर्थः इति दार्शनिक- दृष्टियुक्तशीर्षकाणि विलोक्य निश्चित्य कथयितुं न मनोऽवरुध्नाति।

द्वितीयञ्च स्वामिनारायणाक्षरपीठप्रकाशितं वचनामृतं शीर्षकेषूपर्युक्तमेव वचनामृतग्रन्थं प्रायः अनुसरति। यतो हि स्वामिनारायणाक्षरपीठस्य मातृसंस्थायाः बोचासणवासीश्रीअक्षरपुरुषोत्तम संस्थायाः स्थापकः स्वामी यज्ञपुरुषदासः शास्त्रिमहाराजस्तदनुयायिगुणातीतगुरवो योगिमहाराजः प्रमुखस्वामिमहाराजो महन्तस्वामिमहाराजश्च गुणातीतानन्दस्वामिना भगवत्स्वामिनारायणस्य यद्रहस्य-सिद्धान्तज्ञानं निरूपितं तदेव गुणातीत-ज्ञानमनुसरन्तीति शीर्षकेतिहासावलोकनेनापि विज्ञायते।

---

30. चित्रपट्टम् - 3

चित्रपट्टाणि



चित्रपट्टम् - १

કવી શામળભટ્ટની બનાવેલી

સુડાબહોતેરી.

વારતા ૧ લી.

॥ સરસ્વતિની પ્રાર્થના ॥ (દોહરા) શ્રીમુખ સેવું શારદા, બ્રહ્મસુતા બ્રહ્મ રૂપ; બ્રહ્મ વિદ્યા બ્રહ્મ વાદિની, બ્રહ્મ બોળતા ભુપ. ૧ દંડ કમંડળ ધારણી, બીજા પુસ્તક પાણ; જેને તુહિ મારદા, વદને અમૃત વાણ. ૨ પામરને પંડિત કરે, વિશ્વમાંહી વિખ્યાત; કિંકર મુખ કવિતા કરે, તે તુજ સારદામાત. ૩ જન્મદેવતે કીધો કવી, કીધો કાલીદાસ; માઘને મયવા તેં કર્યો, જેવી વાણી વિલાસ. ૪ (છપા) મારકુંડને માત, ગોદો પ્રકારે તુહી; ચંડી પુરાણ ચોલાખ; વિદ્યા અમૃત ઘન વુડી; શુકદેવ વેદ વ્યાસ, પુરાણ અક્ષરદશી કીધાં; બ્રહ્માને તુહી ભાવ, વેદ વ્યાકરણ શુભ શિખ્યાં; એવા લક્ષો કે કોટીધા, કવિ કહેવાણા માડાપાંત. સુખસાગર સામળ ભણે કૃપા કરી માડા સરસ્વતી. ૫ મંત્ર જંત્રને તંત્ર, ઇષ્ટ ઉપાસન આદે; કથા કિર્તન કવિત વર્તે વિવેકથી વાદે; અડસઠ તિર્થરૂપ અનેક, મહા પુન્યસ્થળ મહિમા, બ્રહ્મ વિષ્ણુ ઇદ્ર, તત્વ ત્રિલોકી શીમા એ સરવને આળખાવિયા, કૃપાથી કહેવાયા કવિ, સરસ્વતિ મોટાં છે સરવથી, ચહોદ રિદ્યા દે નિત નવી. ૬ (દોહરા) કથક કોટી કથકથ સાકથયાગ લક્ષધ; શિવનો શોભક રથાળો, કીધો પંડીત રાય. પ્રીતે મારદા પરભુમુ, હંશ વાહની જેજ; વેણા પુસ્તક મારણી તરણી વધતુ તેજ ૮ કવિતાનો શો આશરો, મારદકેરૂ રાજ, મહિમા મહા માયાતણો, વાયુ વશ જેમ તંતુ જેને તુહી સારદા, નેક રહીશા નુન્ય; કવિ કહેવાચ્યે કલ્પતરૂ, પ્રગટે મોઢાં પુન્ય. ॥ ગણપતિની પ્રાર્થના ॥ (દોહરા) દુંદાળો દુખ ભંજનો, ગુણનીધી ગુજુ ગંભીર; ઋધ્ધિરમી કિતપત્ર હતો, ધર્મ ધુરંધરધીર. સિંદુર અંગે શોભીતુ. માદક અમૃત આહાર, ગજ વદનો ગરવો ઘણો, દેવ વડો દાતાર ૨૨ (છપા) સિદ્ધી બુદ્ધી છે નાર, લક્ષલાભ બે પુત્ર; શિવ સરખો શીર તાત ચિંતામણીના ઘર સુત્ર, આપ શક્તિ ઉમાય, માહા માયા છે માડી. શેષ કહ્યાથી અળાત, ખાણુ રત્નોની ખાડી, બ્રહ્મા વિષ્ણુ રવિ રૂદ્રથી, પ્રથમ પુજા ગણુપતિ તણી. સામળ કહે શેવા સહુ, સુખ સાગર શીમા ઘણી ૧૦ ॥ કૃષ્ણની પ્રાર્થના ॥ (દોહરા) કૃષ્ણ કૃપા કરજો નિધો; દેવકી નંદન દેવ વિશ્વપતી વાસુદેવ સુત, સુર નાકાદિક શેવ ૧૪ (છપા) ગીરગેર ગોકુળચંદ, મથુરાપતિમોટમ મહિમા, પાડવના પ્રતિપાળ, સુખ સાગરની શીમા; પંચાળીનાં ચીર પુર્યાં નવસેં નવાણું; નરશીહાને હાર, દીધો ગાતામાં ગાણું. એ નંદ જસોદા નદને; રમતાં શોક સહુનો સમ્યો, કવિ શામળ સમરે કૃષ્ણને; ભરવાડા બેળો રચ્યો; જરાશનનું જોર. દરપ હાયો દેખતાં, શિશુપાળનું છેદું શીશ પુર બાંધે દેખતાં, ભરવાડનું બાધુ ભાત, જાત કે જાત ન જોઇ, રમિયો વ્રજમાં રાસ, માચ્યુ માંખણ ત્યાં રોઈ કંસ કુંજ કેતે હણ્યો પુતનાને પ્રાજે કરી, સૈવે શામળ શ્રીકૃષ્ણને, સોળ સહસ્ત્ર જેને વરી. ૧૬ ॥ રામચંદ્રની પ્રાર્થના ॥ (દોહરા) રાજીવ લોચન રામજી, મુક્તિ દાતા મુળ; કોટી કોટી પાતક મટે, ટળે સંકટને સુળ. રામ રટે રસના વડે. વળી જે વારંવાર. એથી અન્ય બીજ નહીં, મુક્તિ તણો દાતાર. તારણ ત્રીલોકમાં, તારક મંત્ર કહેવાય; જમને શીર પગ દેઇને જગર વધકુંઠ જાય ૧૯ (છપા) સીતાપતિ શ્રીરામ, નૃપ દશરથનો નંદન, ભક્ત વત્સલ તેજુપ; વિશ્વ સહુનોતે વંદન. કહેશલ્યા કુળ દીપ, લક્ષ્મણ ભરત ભાયક, શત્રુઘ્ન ઉચ્ચર જેહ, નિગમ અગમની નાયક; જેહ ભાણે માસીતાડોકા, સત્રુ રહુમાં

चित्रपट्टम्-१: કવિ શામળ ભટ, સુડાબહોતેરી, પ્ર. પુરુષોત્તમ ગીગાભાઈ પટેલ, ભાવનગર, ૧૯૨૩.



चित्रपट्टम्-२



चित्रपट्टम्-३

सन्दर्भग्रन्थसूचिः

Mudgal S.G., Vaidikatva in indian philosophy and religion, AARSH, Gandhinagar, First Edition, 1996.

स्वामी भद्रेशदासः, ईशाद्यष्टोपनिषत्स्वामिनारायणभाष्यम्, स्वामिनारायण अक्षरपीठ, अमदावाद, प्रथमा आवृत्ति, २००९.

स्वामी भद्रेशदासः, बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम्, स्वामिनारायण अक्षरपीठ, अमदावाद, प्रथमा आवृत्ति, २००९.

केनाद्युपनिषत्पुरुषसूक्तश्रीसूक्तभाष्यम्, उत्तमूर टी. वीरराघवाचार्य, मद्रास, प्रथम आवृत्ति, १९७२.

Māṇḍūkyopaniṣad, Swami Shivananda, Sri Ramakrishna Math, Madras, Fourth Edition, 1939.

मुण्डक-उपनिषद् और माण्डूक्योपनिषद्, पण्डत राजाराम प्रोफेसर, लाहौर,तृतीय आवृत्ति १९२२.

શ્રીઉપનિષદો, અમરજી આનંદજી કચ્છી, પોરબંદર,પ્રથમ આવૃત્તિ, ૧૯૦૩.

भारतकोश, ओनलाईन वेबसाईट.

श्रीमद्भगवद्गीता, शाङ्करभाष्याद्येकादशटीकोपेता, साधले गजानन शम्भु, परिमल पब्लिकेशन, दिल्ली, प्रथम संस्करण, १९९२, भाग १-३.

स्वामी भद्रेशदासः, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्, स्वामिनारायण अक्षरपीठ, अमदावाद, प्रथमा आवृत्ति, २००९.

ચૌધરી રઘુવીર, સ્વામિનારાયણ સંતસાહિત્ય, બોચાસણવાસી શ્રીઅક્ષરપુરુષોત્તમ સંસ્થા, અમદાવાદ, પ્રથમ સંસ્કરણ,૧૯૮૧.

કવિ શામળ ભટ, સુડાબહોતરી, પ્ર. પુરુષોત્તમ ગીગાભાઈ પટેલ, ભાવનગર, પ્રથમ આવૃત્તિ, ૧૯૨૩.

વચનામૃત, હસ્તલિખિત, આર્ષ શોધ સંસ્થાન, પુરાલેખાગાર એસીસી-૮૫.

વચનામૃત, શ્રીસ્વામિનારાયણમંદિર, ગોંડલના આશ્રયે છપાવેલ, રાજકોટ, પ્રથમાવૃત્તિ, ૧૯૫૧.

વચનામૃત, સ્વામિનારાયણ અક્ષરપીઠ, અમદાવાદ, ૨૫મી આવૃત્તિ, ૨૦૦૮.

SUMMARY

Literature can be looked at from a variety of perspectives. It can be examined philosophically, sociologically, historically, linguistically, and in many other ways. Naturally, most literary studies consider a piece of literature's main text, as it is through this portion of the work that the author conveys their primary message. Few studies, however, address the

interplay between a text and its titles and subtitles. Nonetheless, this interplay becomes particularly significant when considering religious texts. Such texts are often subject to intense scrutiny, as they inform the religious praxis and soteriological objectives of vast communities of people. Under such circumstances, the titles and subtitles that pervade such texts are hermeneutically crucial, as they communicate important facets of a text the author wishes to communicate to the audience, essentially framing the text according to a particular hermeneutic.

In the case of Indian religious texts, the dialectic between a work and its titles and subtitles is particularly intriguing because the titles and subtitles of such works are often not established by the text's originator. Instead, at times, they are bestowed by future generations of scholars and are accepted to varying degrees across traditions, revealing much about the fascinating relationship between a text and its reception across religious communities.

This article analyzes the titles assigned to the Vacanāmṛta's discourses and what they reveal about the philosophy contained within the text.

Certainly, the interplay between a text and its titles and subtitles acquires new dynamics across various religious, linguistic, and cultural traditions. Accordingly, the present study is particularly significant because it entails the scrutiny of a text that is not only one of the most important theological texts of the Swaminarayan tradition, but also because it examines a work that is a pristine example of late-medieval Gujarati, which represents a phase in the language's development wherein the language was yet untouched by the influence of colonialism. Therefore, this study has the potential to reveal insights about the interplay between philosophy and language during this important time in Gujarati culture.

Firstly, however, let us contextualize the Vacanāmṛta's titles with a broader discussion of how Indian religious literature as a whole employs titles and subtitles to frame the subject matter under its purview. For instance, the linguistics latent in the title 'Veda' classify the information contained in the foundational texts that bear this name and also inform

its reception. The same can be said of Vedic *sūktas* (prayers), such as the "Puruṣa Sūkta," "Bhūmi Sūkta," and "Nāsadīya Sūkta."

A similar analysis can be offered regarding the Upaniṣads, which can be categorized in two ways: 1) According to the titles of individual Upaniṣads themselves and 2) According to the monikers that describe the various *vidyās* (knowledge systems) contained within particular Upaniṣads.

Titles of individual Upaniṣads, for instance, can be classified as follows:

- Those that reflect the first word appearing in the respective text, such as the Kena Upaniṣad and the Īśa Upaniṣad.
- Those that carry the name of the text's Vedic branch or position within the Vedic corpus, such as the Taittirīya Upaniṣad, the Kaṭha Upaniṣad, and the Aitareya Upaniṣad.
- Those that reflect the size of the text, such as the Bṛhadāraṇyaka Upaniṣad ('bṛhada' means 'vast' in Sanskrit).
- Those that convey the text's format, such as the Praśna Upaniṣad ('praśna' is the Sanskrit term for 'question').
- Those that communicate the name of the person through whom the work was originally revealed, such as the Māṇḍūkya Upaniṣad, which was revealed through a *ṛṣi* named Māṇḍūkya.
- Those that explain the significance of the topics contained within, such as the Muṇḍaka Upaniṣad, whose name suggests that the *brahmavidyā* explained through the Upaniṣad is of utmost importance (the term 'muṇḍaka' means 'head' in Sanskrit).

The Upaniṣads can similarly be scrutinized according to the names of various *vidyās* explained therein, such as the Kaṭha Upaniṣad's *parama puruṣa vidyā*, the Kauṣītakeya Upaniṣad's *pratardana vidyā*, the Muṇḍaka Upaniṣad's *brahmavidyā*, and the Chāndogya Upaniṣad's *sadvidyā* from the sixth chapter and *bhūmā vidyā* from the seventh chapter. Although subtitles encapsulating these *vidyās* do not appear in the Upaniṣads themselves, they are often employed by *acāryas* (teachers) who section

Upaniṣad verses using such subtitles in their celebrated commentarial works.

This same pattern can be seen in the *Śrīmad Bhagavad Gītā*; indeed, each canto of the *Gītā* is entitled in such a way as to reveal the lens through which it is to be seen. The *Gītā's* first canto, for example, is titled "Viṣādayoga" or "Arjunaviṣādayoga," pointing to the canto's primary objective, which is to establish the *Gītā* as being contextualized by Arjuna's sorrow upon having to face his loved ones at war.

As with the Upaniṣads, the *Gītā's* titles often vary across traditions, highlighting the various frameworks used to interpret the text. In this respect, this article also considers the way in which Sadhu Bhadreshdas' *Śrīmad Bhagavad Gītā Svāmināràyaṇa Bhāṣya* diverges from the commentaries authored by previous *ācāryas.* Bhadreshdas' commentary differs by offering distinct titles for certain cantos, and thereby re-establishes these cantos' focal points.

Now let us narrow our focus to titles in Gujarati literature. Works written in Gujarati typically appeared in poetic form until the modern period. Such literature was most often bound by a single title encompassing the entire text. Works such as these generally did not contain subtitles describing individual verses or sets of verses. Instead, groups of verses were set off merely by chapter or *adhyāya* numbers. Examples of such writing include the *Dhīrajākhyāna* and the *Satī Gītā*, texts penned by the 18th-century Swaminarayan poets Niṣkulānanda Svāmī and Muktānanda Svāmī, respectively.

Against this backdrop, one can understand a great deal about the Vacanāmṛta by examining the interplay between its discourses and the titles that bind them. The Vacanāmṛta was the first work of Gujarati prose ever written. In line with previous Gujarati literature, its discourses were sectioned off and numbered, but not titled. It was not until years later that Gujarati prose arose as a genre. It did so primarily through the works of writers such as Dalpattarāma and Narmada. These authors penned many texts that contained anecdotes and short stories that were

not only sectioned off like the Vacanāmṛta, but were also titled. Perhaps ascertaining from such works, early disciples of Swaminarayan assigned titles to each of the Vacanāmṛta's discourses.

This article explores the dynamic of Vacanāmṛta discourse titles, specifically addressing how they came about, what they encompass, and how they contextualize the text's significant philosophical contributions. It relies primarily on an edition of the Vacanāmṛta printed in the city of Gondal, Gujarat in 1951. The BAPS edition of the Vacanāmṛta largely coincides with this edition. Gondal was part of the Saurashtra region, an area heavily influenced by Akṣarabrahman Guṇātītānanda Svāmī's 40 years of ministry that culminated with his passing in 1867. Accordingly, the titles encompassed within the Gondal edition of the Vacanāmṛta closely mirror the teachings of Guṇātītānanda Svāmī, who was widely known in the fellowship as one who had fully comprehended and imbibed Bhagavān Svāmināārāyaṇa's (Swaminarayan's) teachings. The Gondal edition of the Vacanāmṛta thus begins with a tributary—an image of Guṇātītānanda Svāmī that labels the great teacher as one with great expertise in understanding and helping others understand the Vacanāmṛta's core principles. The titles appearing in this edition, therefore, can be said to closely mirror the text's essence.

The titles appearing in the Vacanāmṛta printed from the Gondal edition can be divided into ten unique categories:

1. Those that indicate the discourse's primary subject matter with specific reference to terminology employed in the discourse.
2. Those that summarize the discourse with one or more encompassing terms that do not appear in the discourse.
3. Those that summarize the discourse's subject matter through one or more encompassing terms that appear in the discourse.
4. Those that showcase certain critical words from within the discourse.
5. Those that contain a key example used in the discourse.
6. Those that reflect the name of someone who asks a question

amidst the gathering.

7. Those that make note of *sāstric* references employed within the assembly.
8. Those that describe locations mentioned in the discourse.
9. Those that reflect the name of someone mentioned in the discourse.
10. Those that describe where the assembly took place.

This article discusses these ten categories and provides examples of each. It then considers the Vacanāmṛta's discourse titles both in their own respect and in relation to Bhagavān Swaminarayan's philosophy at large. It accomplishes the latter task by focusing on four fundamental discourses and scrutinizing how their titles draw attention to crucial philosophical principles contained within each of them. The four discourses considered here include:

1. GP-21: "One Possessing Ekāntika Dharma; The Two Forms of Akṣara"
2. GP-71: "Understand that God Manifests with His Akṣaradhāma"
3. GM-9: "Realizing God to be like the Other Avatāras is Blasphemy"
4. GM-42: "Akṣara has both Saguṇa and Nirguṇa Aspects; The Key"

In this way, the present article discusses the unique way in which the Vacanāmṛtas' titles, which stemmed from Guṇātītānanda Svāmī's teachings, focus the text's reception on Bhagavān Swaminarayan's teachings. Amidst the context of the titles and subtitles as they appear in Indian religious works and Gujarati literature, this work provides insights into the relationship between language, philosophy, and the transmission of values over successive generations of religious thinkers and practitioners.